**|| श्री स्वामी समर्थ ||**

---

# ||त्रिपुर लक्ष्मी कवचम्|

---

देव्युवाच

भगवन् सर्वधर्मज्ञ सर्वशास्त्रार्थ पारग।
त्रिशक्तिरूपा लक्ष्म्याश्च कवचं यत्प्रकाशितम्।
सर्वार्थसाधनं नाम कथयस्व कृपाम्बुधे ॥

ईश्वरोवाच

श्रृणु देवि प्रवक्ष्यामि कवचं परमाद्भुतम्।
सर्वार्थं साधन नाम त्रैलोक्ये चातिदुर्लभम् ॥
सर्वं सिद्धिमयं देवि सर्वेश्वर्य प्रदायकम्।
पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्यवेत् ॥

विनियोग

सर्वार्थं साधनस्यास्य कवचस्य ऋषिः शिवः ॥
छन्दोर्विराए् त्रिःशक्तरूपा जगद्धात्री च देवता।
धमार्थकाम मोक्षेषु विनियोगः प्रकीर्तितः ॥

अथ कवचं

श्रीबीजं मे शिरः पातु लक्ष्मीरूपा ललाटकम् ।

ह्रीं पातु दक्षिणं नेत्रं वामनेत्रं सुरेश्वरी ॥
क्लीं पातु दक्षकर्णं मे वामं कामेश्वरी तथा।
लक्ष्मीर्घ्राणं सदा पातु वदनं पातु केशवः॥
गौरी तु रसनां पातु कंठं पातु माहेश्वरी।
स्कन्धधदेशं रतिः पातु भुजौ तु मकरध्वजः ॥
शङ्खनिधि करौ पातु वक्षः पद्मनिधिः सदा।
ब्राह्मी मध्यं सदा पातु नाभि पातु महेश्वरी ॥
कुमारी पृष्ठ देशंमे गृह्यं रक्षतु वैष्णवी।
वाराहि स्कथिनि पातु ऐं ह्रीं पातु पदद्वयम् ॥
भार्या रक्ष तु चामुंडा लक्ष्मी रक्षतु पुत्रकान्।
इन्द्र पूर्वः सदा पातु आग्नेयामग्निदेवता ॥

याम्ये यमः सदा पातु नैऋत्ये निर्रतिश्च माम्।
पश्चिमे वरुणः पातु वायव्यां वायुदवेता ॥
सौम्ये सोमः सदा पातु ऐशान्यामीश्वरोऽवतु ।
उर्ध्वं प्रजापतिः पातु अधश्चानन्तदेवता ॥
राजद्वारे श्मशाने च अरण्ये प्रान्ते तथा।
जले स्थले चान्तरिक्षे शत्रुणा विग्रहे तथा ॥
एताभिः सहिता देवीत्रिबीजात्मा महेश्वरी।
त्रिशक्तिश्च महालक्ष्मीः सर्वत्र मां सदाऽवतु ॥

इति ते कथितं देवि सारात्सारतरं परम्।
सर्वार्थसाधनं नाम् कवचं परमाद्भुतम् ॥
अस्यापि पठनात्सद्यः कुबेरोपि धनेष्वरः।

इन्द्राद्याः सकला देवा धारणात्पठनाद्यतः ॥
सर्वसिद्धीश्वराः संतः सर्वेश्वर्यम् वाप्नुयुः।
पुष्पाञ्जल्यष्टकं दतत्वा मूलै नैव पठेत्सकृत्॥
संवत्सर कृतायास्तु पूजायाः फलमाप्नुयात्।
प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे ॥
वाणी च निवसेद्वक्त्रे सत्यं न संशयः।
यो धारयति पुण्यात्मा सर्वार्थं साधनाभिधम्॥
कवचं परमं पुण्यं सोपि पुण्यवतां वरः।
सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् ॥
पुरुषो दक्षिणे बाहौ नारी वाभुभुजे तथा।
बहुपुत्रवती भूत्वा वंध्यापि लभते सुतम् ॥
ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तं जनम्।
एतत्कवचमनज्ञात्वा यो जपेत्परमेश्वरीम् ।
दारिद्रयं परमं प्राप्य सोऽचिरान्मृत्यु माप्नुयात् ॥
॥ इति श्रीरुद्रयामले त्रिशक्त्याः सर्वार्थ साधनं नाम्नां कजम् ॥

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थार्पण मस्तु||

---